# A-I/1/2254/ 21

## द्वितीयसत्रार्द्धम्

## प्रथमपत्रम्

## साहित्यम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. काव्यप्रकाशस्य चतुर्थोल्लासे प्रतिपाद्यः विषयः कः?
2. अविवक्षितवाच्यध्वनेः भेदौ कौ?
3. यत्र प्रधाने वाक्यार्थे अङ्गभूता रसादयः तत्र के के अलङ्कारा भवन्ति?

**अथवा**

रसभावतदाभासादिः कीदृशः ध्वनिः?

4. उत्पत्तिवादं कः प्रस्तौति?

**अथवा**

साधारणीकरणं केन अङ्गीक्रियते?

5. अष्टौ नाट्ये रसाः स्मृताः। के ते?
6. अनौचित्यप्रवर्तिताः के?
7. वाच्यसिद्ध्यङ्गव्यङ्ग्यस्य उदाहरणं किम्?

**अथवा**

'अत्रासीत् फणिपाशबन्धनविधिः' इत्यादिपद्यं कस्य गुणीभूतव्यङ्ग्यभेदस्य उदाहरणम्?

8. 'जनस्थाने भ्रान्तम्' इत्यादिपद्ये कस्यार्थस्य वाच्याङ्गता?
9. काक्वाक्षिप्तव्यङ्ग्यस्य उदाहरणं किम्?

**अथवा**

असुन्दरव्यङ्ग्यस्य उदाहरणं किम्?

10. 'भ्रमिमरतिमलसहृदयताम्' इत्यादिपद्ये कीदृशं गुणीभूतव्यङ्ग्यम्?

**अथवा**

अस्फुटव्यङ्ग्यस्य उदाहरणं किम्?

11. अदृष्टे दर्शनोत्कण्ठा इत्यादिपद्यं कस्य उदाहरणम् ?

12. गुणीभूतव्यङ्ग्यस्य भेदाः के ?

13. 'हरस्तु किञ्चित्परिवृत्तधैर्यः' इत्यादिपद्ये व्यङ्ग्यार्थः कः ?

14. मीमांसकेषु अन्विताभिधानवादिनः के ?

15. 'सोऽयमिषोरिव दीर्घदीर्घतरो व्यापारः' इत्यस्य कोऽभिप्रायः ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः। (5×6=30)**

16. अर्थान्तरसङ्क्रमितवाच्यध्वनिं सोदाहरणं निरूपयत।

17. रसानुमितिवादं निरूपयत।

18. शब्दशक्तिमूलालङ्कारध्वनिं सोदाहरणं निरूपयत।

**अथवा**

अयं स रशनोत्कर्षी पीनस्तनविमर्दनः।

नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः॥

–ससन्दर्भं व्याख्यात।

19. अस्फुटव्यङ्ग्यकाव्यं सोदाहरणं निरूपयत।

**अथवा**

सन्दिग्धप्राधान्यं सोदाहरणं निरूपयत।

20. अभिहितान्वयवादे व्यङ्ग्यार्थस्य अभिधेयत्वं निराकुरुत।

**अथवा**

लक्षणातः व्यञ्जना भिन्नतया कुतः अङ्गीकर्तव्या इति उपपादयत।

**स. निबन्धात्मकः प्रश्नः समाधेयः। (1×20=20)**

21. रसस्वरूपं प्रतिपादयत।

**अथवा**

अर्थशक्त्युद्भवध्वनेः स्वतः सम्भविनः भेदान् सोदाहरणं निरूपयत।

**अथवा**

गुणीभूतव्यङ्ग्यस्य भेदान् सोदाहरणं निरूपयत।

# A-I/2/2255/ 21

## द्वितीयसत्रार्द्धम्

## द्वितीयपत्रम्

## साहित्यम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. ध्वनिः सामान्यतः कतिविधः?
2. 'स्निग्धश्यामल. . . . .' इत्यस्मिन् पद्ये ध्वनिप्रतिपादकः शब्दः कः?
3. 'तदा जायन्ते गुणा. . . . .' इत्यत्र व्यञ्जकशब्दः कः?
4. 'रविसङ्क्रान्त. . . . .' इति पद्यं कस्माद् ग्रन्थादुद्धृतम्?
5. विवक्षितान्यपरवाच्यस्य भेदद्वयं किम्?
6. असंलक्ष्यक्रमोद्योतः कः?
7. यत्र व्यङ्ग्यः वाच्यार्थापेक्षया क्रमेण प्रकाशते तत्र कः ध्वनिः?
8. 'रसभावतदाभासः. . . . .' कारिकां पूरयत।
9. 'रसादिपरता' इत्यत्र आदिशब्दस्य कोऽर्थः?
10. प्रसादगुणस्य लक्षणं किम्?
11. विवक्षितान्यपरवाच्यध्वनिः इत्यत्र अन्यपरमित्यस्य अभिप्रायं लिखत।

**अथवा**

स च रसादिलङ्कारः कतिविधः?

12. 'क्षिप्तो हस्तावलग्नः . . . . .' इत्यत्र वाक्यार्थः कः? अङ्गभूतरसश्च कः?

**अथवा**

रसादेरलङ्कारस्य विपक्षाः के?

13. यत्र अचेतनानां चेतनवस्तुवृत्तान्तयोजना भवति तत्र रसादिः कः?

**अथवा**

अङ्गाश्रिताः के?

14. अङ्गभूते शृङ्गारे अनुप्रासनिबन्धनं कथम्?

**अथवा**

एकेनैव प्रयत्नेन निर्वर्त्यन्ते महाकवेः - कानि?

15. अर्थशक्त्युद्भवध्वनेः स्वरूपं किम्?

**अथवा**

"तत्पूर्णं ध्वनिलक्षणम्" कथम्?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. वाच्यवाचकचारुत्वहेतूनां विविधात्मनाम्।

रसादिपरता यत्र स ध्वनेर्विषयो मतः॥

-इति कारिकां व्याख्यात।

17. रसध्वनौ शब्दालङ्कारनिबन्धनं विमृशत।

**अथवा**

शब्दशक्त्युद्भवध्वनेः श्लेषस्य च भेदं दर्शयत।

18. अत्यन्ततिरस्कृतवाच्यध्वनेः लक्षणं सोदाहरणं प्रतिपादयत।

19. व्यतिरेकध्वनिं सोदाहरणं परामृशत।

**अथवा**

श्लेषध्वनिं सोदाहरणं परामृशत।

20. अलङ्कारध्वनेः प्रयोजकतां निर्दिशत।

**अथवा**

अविवक्षितवाच्यस्य ध्वन्याभासं व्याख्यात।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. रसरसवदलङ्कारयोः पार्थक्यं विस्तरेण दर्शयत।

**अथवा**

गुणान् सप्रपञ्चं निरूपयत।

**अथवा**

अविवक्षित-विवक्षितान्यपरवाच्ययोः ध्वन्योः ध्वन्याभासं विवृणुत।

# A-I/3/2256/ 21

## द्वितीयसत्रार्द्धम्

## तृतीयपत्रम्

## साहित्यम्

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयप्रश्नाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. नाट्यसङ्ग्रहः नाम कः ?

2. नाट्याभिनयाः कति ? तन्नामानि कति ?

3. षाडबादयो रसाः नाम के ?

**अथवा**

अतिहसितलक्षणं किम् ?

4. शृङ्गारः कतिविधः ? तद्भेदाः के ?

5. भावः इति कथं संज्ञितः ?

**अथवा**

अनुभावः इति कस्मात् ?

6. शोकः केभ्यः विभावेभ्यः उत्पद्यते ?

**अथवा**

विस्मयाभिनयः कथं प्रयोक्तव्यः ?

7. व्यभिचारी इति पदस्य का व्युत्पत्तिः ?

8. 'अश्रु' केभ्यः विभावेभ्यः समुत्पद्यते ?

9. रौद्ररसस्य वर्णः कः ?

10. प्रलयः केभ्यः जायते ?

**अथवा**

शान्तस्य पञ्च भेदाः के ?

11. रोमाञ्चभावः कथं प्रदर्शनीयः ?

12. वीररसे कः स्थायी ?

13. कति प्रवृत्तयः ? तासां नामानि कानि ?

14. भरतरससूत्रं किम् ?

15. हास्यरसः कथं ज्ञेयः ?

**अथवा**

करुणरसस्य देवः कः ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. आतोद्यं सविस्तरं विशदयत।

**अथवा**

भरतोक्तदिशा कस्य आस्वाद्यत्वं रसः इति विशदयत।

17. अद्भुतरसविभावादीन् प्रतिपादयत।

18. त्रिविधं रुदितं सम्यक् निरूपयत।

19. स्मृतिव्यभिचारिभावं स्पष्टयत।

**अथवा**

जुगुप्सा-स्थायिभावं वर्णयत।

20. श्रृङ्गारस्य रसत्वमुपपाद्य सः कतिविधः इति विवृणुत।

**अथवा**

सात्त्विकभावौ स्तम्भकम्पौ सम्यक् लिखत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. नाट्यसङ्ग्रहं सम्यक् प्रतिपादयत।

**अथवा**

सविस्तरं वीररसं विवेचयत।

**अथवा**

सप्तमाध्यायगतान् विषयान् संक्षेपेण लिखत।

# A-I/4/2257/ 21

## द्वितीयसत्रार्द्धम्

## चतुर्थपत्रम्

## साहित्यम्

**समय: घण्टात्रयम्** **पूर्णाङ्का: 80**

**अ. सर्वे अतिलघूत्तरीया: प्रश्ना: समाधेया:।** **(15×2=30)**

1. वेणीसंहारे कति अङ्का: ?
2. वेणीसंहारे नायिका का ?
3. 'धार्तराष्ट्रा:' – इत्यत्र प्राकरणिकार्थ: क: ?
4. कृष्णद्वैपायन: क: ?
5. 'सन्धिं करोतु भवतां नृपति: पणेन' – इति कस्य वचनम् ?
6. 'चत्वारो वयमृत्विज:' – अत्र चत्वार: के ?
7. वृकोदरशब्दस्य व्युत्पत्ति: कथम् ?
8. 'शैलूषापसद'इत्यस्य समानार्थकं पदं किम् ?
9. अभिमन्यो: माता का ?

**अथवा**

रुधिरप्रिय: क: ?

10. धृष्टद्युम्न: कस्य आचार्यस्य हन्ता आसीत् ?
11. "सूतो वा सूतपुत्रो वा योद्धा को वा भवाम्यहम्" इति क: कं प्रति वदति ?

**अथवा**

'किं नाम जात्या काममवध्योऽहम्। इयं सा जाति: परित्यक्ता' इति क: कं प्रति कथयति ?

12. जयद्रथ: क: ?

**अथवा**

अश्वत्थाम्न: मातुल: क: ?

13. दुर्योधनस्य पत्न्या: किं नाम ?

**अथवा**

वृषसेन: कस्य पुत्र: ?

14. 'निर्वीर्यं वा सवीर्यं वा मया नोत्सृष्टमायुधम्। यथा पाञ्चालभीतेन पित्रा ते बाहुशालिना॥'

–अत्र पाञ्चालभीतः कः?

**अथवा**

'अरे रे रथकारकुलकलङ्क, राधागर्भभारभूत!' –अत्र कः संबोधितः?

15. 'भवति संयम्यतामिदानीं धार्तराष्ट्रकुलकालरात्रिः दुश्शासनविलुलितेयं वेणी' –अत्र कः सन्दर्भः?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः। (5×6=30)**

16. 'वक्तुं सुकरमिदं दुष्करमध्यवसितुम्' वाक्यमिदं ससन्दर्भं व्याख्यात।

**अथवा**

'इन्द्रप्रस्थं वृकप्रस्थं जयन्तं वारणावतम्। प्रयच्छ चतुरो ग्रामान् कञ्चिदेकं तु पञ्चमम्॥'

–इति सप्रसङ्गं व्याख्यात।

17. 'स्त्रीणां हि साहचर्यात् भवन्ति चेतांसि भर्तृसदृशानि।

मधुरापि हि मूर्च्छयते विषविटपिसमाश्रिता वल्ली॥' –पद्यमिदं सप्रसङ्गं व्याख्यात।

**अथवा**

'तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयाम्' इत्यादि श्लोकं तात्पर्यसहितं व्याख्यात।

18. 'दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम्' – इति वाक्यं यथासन्दर्भं विवेचयत।

**अथवा**

कर्णस्य चरित्रं चित्रयत।

19. अश्वत्थाम्नः स्वभावं विशदयत।

20. 'बुद्धिमतिके!, क्व सा सम्प्रति भानुमति या अपहसति पाण्डवदारान्' –इति वाक्यं ससन्दर्भं स्पष्टयत।

**स. निबन्धात्मकः प्रश्नः समाधेयः। (1×20=20)**

21. वेणीसंहारनाटकाधारेण भट्टनारायणस्य प्रतिभां प्रतिपादयत।

**अथवा**

तृतीयाङ्कस्य कथां विस्तरेण विशदयत।

**अथवा**

वेणीसंहारे युधिष्ठिरस्य स्वभावं विवेचयत।